SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

# राष्ट्रियशिक्षानीति-परिप्रेक्ष्ये शिक्षकस्य भूमिका

ई सङ्ग्रामनारायणः

SAMVARDHINI :- 01/12/2025
Volume - 7
Issue - 2
(ISSN ONLINE :- 2583-7176)
https://samvardhini.in

ई सङ्ग्रामनारायणः
504, Sec-45, Noida,
Gautam Buddha Nagar, UP
201302
Email - esangramnarayan@gmail.com

**शोधसारः**

**ऋतं सत्यं परब्रह्म पुरुषं कृष्णपिङ्गलम्।**
**ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः।।**

शिक्षा मानवसभ्यतायाः आधारस्तम्भमिव तदैतिह्यं विकासयति। शिक्षा सा प्रक्रिया वर्तते येन मनुष्यः वास्तविकस्य यथार्थस्य च स्वरूपं जानाति। सैव आमृत्युपर्यन्तं मनुजेन सह काञ्चन आध्यात्मिकप्रक्रियामुपैति। जीवनं प्रति मनुष्यस्य व्यवहारविचारादिषु नैरन्तर्यपरिवर्तन-परिमार्जनसंशोधनानि एतयैव जायते। शिक्षा सा वर्तते येन संस्कृतिः, सभ्यता एवं युगान्तरेषु संचालितज्ञानमेतेषां नवसन्ततिषु संप्रेषणं क्रियते। यथोक्तं आचार्यपादेन कौटिल्येनापि-

**विद्याविनीतो राजा हि प्रजानां विनये रतः।**
**अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः।।**[1]

तक्षशिलानालंदादिषु प्रख्यातविश्वविद्यालयेषु देशस्यास्य भारतस्य प्राचीनशिक्षा-प्रणाली प्रोन्नतमबोभूयिष्ट। ऐतिहासानुसारेणौपनिवेशकैः सैषाशिक्षाव्यवस्था प्रतिकूलं प्रभवत्। तत्कारणं यत् देशोऽयं परौपनिबन्धकेन ग्रसिता आसीत्। तदेदानीं तृतीयपरिवर्तनं 'राष्ट्रीयशिक्षानीतिः-२०२०' भारतीयशिक्षाव्यवस्थामनुसृत्य विधीता काचन नीतिरिति स्वामीविवेकानन्दप्रभृतीनां शिक्षा आदर्शरूपेण दरीदृश्यते। राष्ट्रीयशिक्षानीत्यामाधुनिकतया सह तदादेशानामपि समावेशितं येषामायोजनं प्राग्दशके आचार्यैराचरितम्।

कस्मिंश्चिदपि देशे भ्रष्टमुक्ताः लावण्यमस्तिष्काः सति तदयमुन्नतिं प्राप्नोतीति मे दृढविश्वासः यदेतादृशपरिवर्तनहेतुभूताः पितरौ शिक्षकश्चैवालङ्कुर्वन्ति इति कथनमिदं डॉ. ए.पी.जे. अब्दुल कलामवर्याणां वर्तते। शिक्षा कस्मिंश्चिदपि

1. कौ.अर्थ.- प्र-2 अ-1

राष्ट्रविकासे आधारभूतत्वेन निहितो वर्तत इति प्रसिद्धम्। स्तम्भमिमं प्रगूढयितुं शिक्षकस्य भूमिका सर्वोपरि स्थीयते। भारतीयसंदर्भे गुरुशिष्यपरम्पराया ऐतिह्यमनावृतरूपेण दीव्यति। शिक्षकं मार्गदर्शकत्वेन, ज्ञानदातृत्वेन उताहो समाजनिर्मातृत्त्वेन न्यवेदिष्मः। राष्ट्रीयशिक्षानीति २०२० (NEP २०२०) भारतस्य शिक्षाप्रणाल्यां कानिचन युगान्तकारीणि परिवर्तनानि लक्ष्याणि तास्थान्ति, एवममुष्य परिवर्तनस्य केन्द्रे शिक्षकमेव प्रतिष्ठापयति। शोधोऽयं यथानिर्णितविषये राष्ट्रीयशिक्षानीतौ शिक्षकस्य भूमिका विस्तृतविश्लेषणं ख्यापयति।

**प्रस्तावना**

प्रत्येको देशः आदिकालप्रभृति सामाजिकाभिव्यक्तये सांस्कृतिकाभिव्यक्तये विकासाय च अद्वितीयशिक्षापद्धतिं विकासनं संवर्द्धनञ्च क्रियते। कालान्तरेऽवश्यकतानुसारं तत् स्वरूपं परिवर्तयति परिमार्जनं च विदधाति। यद्यपि भारते प्रारम्भादेव ज्ञानस्यात्यन्तसमृद्धा परम्परा स्थिता आसीत् यथोक्तं तत्कालीनयात्रिणा[2]- **भारते शास्त्रस्य कण्ठमात्रं सति तस्य सम्मानपात्रता प्रदीयते स्म किं तावत् शास्त्रस्य पारम्परिकरूपेणाध्यवसिते तस्येश्वरत्त्वमिव समाजे स्थितिरासीत्।** परं शनैः शनैः तस्य बहुतरं सामाजिक्यार्थिकीराजनीतिकीहेतोः भारतीयज्ञानस्य अवच्छिन्नपरम्परायाः विकासे बाधा प्रभूत्त्वेन औपनिवेशकोद्देशेन (BEIC) इत्यादिनां भारतदेशे स्थापिते सति प्रायरवरुद्धमभूत्। स्वतन्त्रभारते संविधान-स्थापनायां धर्मनिरपेक्षताप्रजातंत्रादीनां स्थापनावसरे तद्गतमूल्यानां निर्धारिते सति तत्प्राप्तये संकल्पना राष्ट्रीयाशिक्षाव्यवस्थायाः माध्यमेन विधीता। नूतनशिक्षानीतिरनुसारं संकल्पित-विषयाणां संसाधनानाञ्च केन्द्रीकरणमपि सम्यक्तया ससाफल्यमुपपादयत्। कस्याञ्श्चिदपि कार्ययोजनायां सफलताप्राप्ते तत्परिस्थितिनां भूमिका प्रामुख्येन समुपतिष्ठति।

शिक्षाव्यवस्थायाः मूलभूतस्य परिवर्तनेषु शिक्षकाय महत्वपूर्णरूपेण प्राथमिकं प्रदीयते। प्राचीनकालादेव स्वविद्वत्तायाः फलस्वरुपमत्यंगौरवयुक्ताः शिक्षकाः विगतसमयेषु तत्स्थानं सम्मानञ्च पूर्वं यथा आसीत्। देशस्य सर्वांगीणविकासे श्रेष्ठाः नागरिकाः अपेक्षन्ते तच्च शिक्षक एव रिक्तमापूर्त्तयति। अद्यत्वे क्षेत्रमिदं योग्यशिक्षकाणमस्यां वेलायां न्यूनत्वं वरीवर्ति। प्रशिक्षणं खलु तदाधारो वर्तते येन तेषां सुरक्षा जायते। एतादृशं शिक्षणस्तरं पुनः सम्माननीयपूर्वकं स्थापयितुं तदियं नीतिः निर्धारिता वर्तते। राष्ट्रीयाशिक्षानीतिः २०२० इत्यस्मिन् शिक्षकं भारतीयशिक्षाप्रणाल्याः पुनरुत्थानाय केन्द्रे स्थापयति।

नीतिरियं शिक्षकान् न केवलं पाठ्यक्रमवितरणकत्वेनापितु मार्गदर्शकत्वेन सुविधाप्रदातृत्वेन नवाचारकर्तृत्वेन तथा राष्ट्रनिर्मातृत्वेन दर्द्दशीति। ऐतिहासिकदृष्ट्या शिक्षकस्य भूमिकायामूर्ध्वाधं द्रष्टुं

2. Pg-119, Guru (The Search For Enlightment), John Mitchiner

शक्यतैव परन्तु NEP २०२० इति नीत्यामुच्चतमे शिखरे पुनर्स्थापितस्य प्रयासः चेक्रीयत। कस्मैचिदपि छात्रेभ्यः वास्तविकरूपेण केनचिदपि शिक्षकेन न शिक्ष्यते परं प्रत्येकाः स्वयमेव ज्ञानं विदधन्ति। बाह्यशिक्षकस्तु केवलं तदेव पथं निर्दिदिशति येन आन्तरिकशिक्षकाय विषयप्रभेदानां बोधः जायताम्। शिक्षकाणां चरित्रव्यक्तित्वयोरभिनिवेशः विधातव्यः यतः आत्मने परेभ्यश्च सत्यप्रदानाय हृदयस्य आत्मनश्च पवित्रता पौनःपुन्येन करणीयम्। शिक्षककार्यं न केवलं शिष्याणां क्षमतायाः प्रोत्साहनमपितु ज्ञानस्य हस्तांतरणे बौद्धिकप्रभावस्यापि निश्चयति। शोधपत्रेऽस्मिन् शिक्षकाधारिते विषये नैकेषु लेखकानां तद्गतविषयेषु शोधार्थिनां लेखाः प्रमाणत्त्वेनोपस्थापिताश्च सन्ति। पाठकानां समेपि विदुषां प्रज्ञाभिवृद्धिं भगवन्तं प्रार्थना कल्पेयम्। अज्ञानवशादुल्लिखितं दोषं विद्वद्भिः नितरा क्षन्तव्येति आशासे।

**ऐतिहासिकपरिप्रेक्ष्यम्**

प्राचीनकाले गुरुकुलव्यवस्थायां शिक्षकस्य केंद्रीयत्वं तावत् नैतिकत्वेन आध्यात्मिकत्वेन बौद्धिकत्वेन च विकासाय आसीदिति ग्रन्थेषूपलभ्यते। प्रजापतिना मनुना तेषां लक्षणावसरे तस्यैव गुरुत्त्वेन, आचार्यत्त्वेन, उपाध्यायत्त्वेन च भेदः सम्यग्प्रगीतम्। तद्यथा-

**उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।**
**सङ्कल्पं सरहस्यं च तमाचार्यं प्रचक्षते।।**
**एकदेशं तु वेदस्य वेदाङ्गान्यपि पुनः।**
**योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते।।**
**निषेधकादीनि कर्माणि यः करोति यथाविधिः।**
**संभावयति चान्नेन स विप्रो गुरुरुच्यते।।**[3]

ज्ञानस्य हस्तांतरणे व्यक्तिगतरूपेण शिक्षकः केन्द्रीभूतः आसीत्। शिक्षकाय ससम्मानं तेषामधिकाराणां सामाजिकरूपेण आहोस्वित् धार्मिकरूपेणोपाकरणाय स्वातन्त्र्यमासीत्। यथोक्तं सदानन्देनापि- **श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति**[4] कालेऽस्मिन् पिता पुत्रं प्रारम्भिकशिक्षा प्रददाति स्म। यथा उपनिषदि श्वेतकेतु-आरुणेयसन्दर्भे प्राप्यते[5]। छात्राणां जीवनाकाराय अस्यैव भूमिका श्रेष्ठा वरीवर्ति इति निर्विवादम्। यथा महाभाष्ये सिद्धे शब्दार्थसम्बन्धे इति वार्तिकमाचक्षाणः पतञ्जलिना प्रोक्तम्- **माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते**[6] इत्यनेन लक्ष्यते यदाचार्यः न केवलं शिक्षायै अपितु शिष्यस्यापि मङ्गलार्थं साध्यं विदधाति स्म। मध्यकालीने

3. मनु-2.140-142
4. वे.अनुभवचतुष्टये
5. छा. 5/3/1, 6/1/1
6. महा. पश्पशाह्निके

पाठशाला-प्रणालीनामुदयेऽपि विषयाणामत्यधिकसमावेशे शिक्षकस्य प्राधान्यत्त्वे निम्नतरं दृश्यते, तद्यथा **ज्योतिः शास्त्रपारङ्गतः सकलविद्याचातुर्यवान् ब्राह्मणः**[7] इत्यनेन तत्कालीने देशे विषयाणां समावेश्चात्यधिकरूपेण १६तमाब्दीये ग्रन्थे संदृश्यते। अस्यैवाधीनत्वमासीत् तथा विद्यायाः संरक्षकरूपेण शिक्षकमादिदेषुः। औपनिवेशिके काले लार्डमैकालेत्यस्य "मिनट" नीतिः एवं पश्चिमीशिक्षाप्रणाल्याः परिचयोऽलभत्। कालेऽस्मिन् शिक्षकस्य भूमिकायां निम्नत्वं प्रादर्शिषत, यतः पाठ्यक्रमसंचालनं, परीक्षोन्मुखशिक्षाणां प्रभावः पर्यदृश्यते। शिक्षणं केनचिद् धनार्जनरूपेण व्यपदेशनं न तु पुण्यजनन-योग्यत्त्वरूपेणासीत्। शिक्षकप्रशिक्षणसंस्थानानामुदयः उभयोः नकारात्मक-सकारात्मकप्रभावयोः प्रभूतश्चासीत्। तद्यथा हिन्दीसाहित्यस्य प्रसिद्धोपन्यासकारः मुंशीप्रेमचन्द्रस्य कर्मभूमीत्याख्योपन्यासे द्रष्टुं शक्यते। स्वतंत्रताप्राप्त्यनन्तरकाले भारते विभिन्नशिक्षायोगानां नीतिनां च सङ्गठनमजनिषत। राधाकृष्णन् आयोगः (१९४८-४९): अस्योद्देश्यं शिक्षकाणां वेतननिर्धारणं, प्रशिक्षणं तथा सामाजिकीयस्थितिषु विशोधनमासीत्। शिक्षकं राष्ट्रनिर्मातृरूपेण ज्ञापनप्रयासोऽपि अनेनैवान्तरधीयत इति निर्विवादम्। कोठारी आयोगः (१९६४-६६): अस्योद्देश्यं शिक्षायाः राष्ट्रीयलक्ष्यप्राप्तिक्रियमाणेषु शिक्षकस्य केंद्रीयभूमिकात्त्वेन निर्वाचनं, शिक्षकस्य शिक्षायां संशोधनं, व्यावसायिकी विकासः तथा अनुसन्धानात्मकशिक्षायाः निर्देशनं निर्दिदिशते। राष्ट्रीयाशिक्षानीतिः १९६८ एवं १९८६: अस्योद्देश्यं शिक्षकस्य महत्वं कार्यान्वयनयुक्ततया स्वीकरणमासीत्। राष्ट्रीयशिक्षानीत्यां २०२० शिक्षकस्य भूमिका परिवर्तनस्यावश्यकता वैश्विकी-वातावरणं परिदृश्य तथा एकविंशत्तमशताब्दीतमे काले तदुपयुक्तस्य कौशलस्य आवश्यकता आसीत्। तदाधारीकृत्य नीतिरियं घोषिता वर्तते। वर्तमानसमये वैश्विकीपरिदृश्ये शिक्षाव्यवस्थामुत्कृष्टयितुं देशमात्मनिर्भरतामुपैतुञ्च तदनुरूपं निर्दिष्टं डॉ. केके कस्तुरीरंगन वर्यस्य अध्यक्षतायां राष्ट्रीयशिक्षानीतिः २०२० स्थापना समाचष्टे।

## राष्ट्रियशिक्षानीतिः २०२०

तदियं नवीना शिक्षानीतिः राष्ट्रीयशिक्षानीतिः-१९८६ पुरातनं प्रतिस्थापितं यतः पूर्वं १९६८तमे वर्षे इन्दिरागांधीवर्याः तत्सर्वकारश्च तथा १९८६तमे वर्षे राजीवगांधीवर्याः तत्सर्वकारश्च नीतिर्विधीता। अस्यां नीत्यां प्राथमिकीशिक्षातः उच्चशिक्षां यावत् नैकानि परिवर्तनानि विधीतानि सन्ति। तदियं शिक्षानीतिः२०४० पर्यन्तं प्रत्येकेभ्यः शिक्षार्थिभ्यः समानरूपेण सर्वोच्चगुणवत्तायुक्तशिक्षायारुपलब्धिः प्रापयितुं लक्ष्यतीति । शिक्षायाः प्रत्येकस्तरेषु शैक्षिकव्यवस्थायां सांस्कृतिकमूल्यानां केन्द्रीकरणं कृतं वर्तते। शिक्षाविधिषु मध्यान्तरे त्यक्तेऽपि पाठ्यस्य नैष्फल्यमनङ्गीकरोतीति नियामकं नीत्यामस्यां सम्पादितम्। प्राक्तनीयशिक्षाव्यवस्थायां WHAT FOR THINK इति केन्द्रे ऐधत, परञ्चास्यां नीत्यां HOW TO THINK इतिपरिवृत्य केन्द्रिकृता वर्तते। तदियं राष्ट्रियाशिक्षनीतिः २०२० भूमिकामिमां

7. भोजप्रबन्धः

पुनः जागिरते। नीत्यां कक्षाप्रमितिः १०+२ इति पूर्वाधारस्य ५+३+३+४ इत्यर्वाचीनं संप्रेषणं कृतम्। शिक्षानीतिः २०२० विद्यालयेषु भौतिकसंसाधननानां यथा- कक्षास्वच्छता, पेयजलव्यवस्था, परिसरस्य स्वच्छता, विद्युत्पूर्तिः, पुस्तकालयादीनाञ्चोपलब्धता भवेदिति सुनिश्चयति । एषा नीतिः न केवलं पाठ्यक्रमस्याथवा परीक्षापद्धतिषु परिवर्तनमुपानयति, अपितु शिक्षकाणां भारतीयशिक्षाव्यवस्थायां केंद्रभूतत्त्वेन स्थापनमकारिषत्। शिक्षकेभ्यः शिक्षणाय पाठ्यक्रमः तथा तेषां शिक्षणविधेः चयनाय स्वायत्तता प्राप्यते, येन शिक्षार्थीणामधिगमः प्रभावमयं भवेत्।

तदियं शिक्षानीत्यनुसारं कल्पनाशीलता, सृजनात्मकविचारः, धैर्यं, दार्शनिकीशिक्षा, जिज्ञासा, एवं वचनबद्धतादिषु ध्यानं प्रदत्तम्। विद्यालयीयशिक्षायै शिक्षणाधिगमः, ई-सामग्री, NCERT, CIET, CBSE, NIOS तथा अन्येभ्यः संस्थानेभ्यः सर्वासु क्षेत्रीयभाषासूपलब्धिः कारयिष्यते। नीतिरियं त्रिभाषासूत्रस्य विषये स्वप्रतिबद्धतां व्यक्तयति। प्रस्तुतशिक्षानीत्यामुच्चशिक्षा संस्थानेष्वपि द्विभाषान्वितशिक्षणस्य प्रविधिः सम्पादिता वर्तते, येन न केवलं भारतीयशिक्षाणामपितु वैश्विकज्ञानस्याप्यवबोधः कारयिष्यते। राष्ट्रीयशिक्षानीतिः-२०२० पक्षोऽयं महत्वपूर्णस्तावत् यतः विश्वस्मिन् भाषावैज्ञानिकैः कृतानुसंधानस्य मातृभाषायां शिक्षा इति तथ्यं नूनं पुष्टयति यद् मातृभाषायां शिक्षाप्रापणं सर्वाधिका वैज्ञानिकपद्धतिरिति, तथापि विगतवर्षेषु न केवलं वरिष्ठस्यापितु प्राथमिकशिक्षायारध्यापनं आङ्गलभाषायामेव अभवत्। अतः अनया दृष्ट्या मातृभाषायां कक्षा पञ्चमो यावत् मातृभाषायां शिक्षाव्यवस्था महत्वपूर्णमिति प्रतिभामः।

## NEP २०२० इत्यस्मिन् शिक्षकभूमिकायाः परिवर्तनम्

राष्ट्रीयशिक्षानीत्यां शिक्षकान् समाजे सम्मानितः तथा आवश्यकसदस्यरूपेण पुनर्स्थापनमभूत्, यतः शिक्षकाः सशक्ताः भवेयुः येन तेषामादर्शरूपेण लोके स्थितिः स्यात्। शिक्षकं शिक्षाप्रणाल्याः हृद्देशानुभाव्यते। नीत्यानुसारं शिक्षकं न केवलं पाठनमपितु, छात्राणां ज्ञानविकासाय सहायकत्वेनाप्युपस्थितिः नितरा स्यात्। आधुनिकशिक्षाविदा यथोक्तञ्च[8]- **प्रतिभावद्भ्यः शिक्षकेभ्यः स्वकीयसर्वासां पद्धतीनां विकासः संवर्द्धनश्च विधातव्यः। कक्षायां प्रतिभायाः द्वे रूपे स्तः तच्च प्रेरणाव्यापकदृष्टिकोणश्च। येन छात्रस्य तन्माध्यमेन अनुभवसमृद्धिः जायते।** कथनस्य तात्पर्यं तावन्न केवलं तस्याः पद्धतेरवगमनं परं तस्मिन्निष्णाते तत्प्रयोगञ्च सम्यगुपपादयेदितित्येव खलु युक्तम्। रटंतीविद्यामननुसृत्यानुभवात्मकं तथालोचनात्मकं विचाराय प्रवृत्तिं कारयेत्। छात्रकेंद्रितशिक्षायारपि प्रभारकत्त्वं शिक्षकः एव वृणोति येन एतदनुसारं शिक्षकाः कक्षायां रचनात्मकतां तथा जिज्ञासां प्रवृद्धियुक्तानां नवीनशिक्षणपद्धतीनामुपयोगकरणस्यापि विधानं प्रवर्तन्ते। केवलं परीक्षकत्त्वेन नापितु

8. Ch-5 Teaching for Critical Thinking (with emphasis on secondary education), C.Burleigh Wellington, Jean Wellington, McGraw-Hill Book Company

छात्राणां प्रगतिः नैरन्तर्येणाकलनं करिष्यमाणः शिक्षकोद्देश्यं नीत्यां विहिता वर्तते, येन तन्निष्ठच्छात्राणां गतिरवश्यमेव आधुनिकसामञ्जस्यापेक्षाया-मुत्तरोत्तराभिवृद्धिमन्वैति। समुदायेभ्यः अभिभावकेभ्यश्च सहाभ्युपगमः (CPE)[9], प्रत्येकैकस्य छात्रस्य विशिष्टतामनुभूयावश्यकतानुसारं तदवगमनं तथा पूर्तिकरणं, विशेषावश्यकवन्तेभ्यः(CWSN) छात्रेभ्यः तद्युक्तं वातावरणस्थापनम्, आर्थिकरूपेण सामाजिकीरूपेण वंचितेषु बालकेषु विशेषतया संदर्शनं, स्थानीयसंदर्भानुसारं पाठ्यक्रमनुकूलयितुं शिक्षकस्यैव स्वातंत्र्यत्त्वमिति नीत्या विहिता वर्तते। यथा छात्राणामाकलनं अनया नीत्या त्रिषुस्तरेषु जायत इति, तत्रादौ छात्रस्स्वयमात्मानमाकलयति तदनु द्वितीयः तत्सहपाठिभ्यः संजायते ततश्च तृतीयः शिक्षकस्स्वयमेवोपतिष्ठति। बहुस्तरीय-प्रवेशनिकासीव्यवस्थानामायोगः विधीतः येन छात्रः स्नातके शिक्षणाधिगमसामग्रीं विकासाय सक्रियरूपेण शिक्षस्यैव भूमिका। शिक्षकशिक्षायां परिवर्तने चतुर्वर्षीय-एकीकृतः (B.Ed) शिक्षाशास्त्रत्युपाधये लक्ष्यं विहिता। शिक्षकपात्रतापरीक्षायाः (TET) विस्तारोऽपि शिक्षकेभ्यः कृता। राष्ट्रीयाध्यापकशिक्षापरिषदः (NCTE) पुनर्गठनं तथा तेषां भूमिकासम्पादनञ्चापि कृतः। सततव्यावसायिकविकासं प्रति प्रतिबद्धता (CPD) नवीनतमशैक्षणिकप्रवृत्तिभ्यः प्रौद्योगिकीप्रवृत्तिभ्यः शिक्षणशास्त्रप्रवृत्तिभ्यश्चावगतभूतः स्यात्। सामाजिकाधिकारस्य तथोत्तरदायित्वस्य संतुलनं शिक्षकान् यथोचितस्वायत्तता प्रदानमावश्यकं परञ्च एतया सहोत्तरदायित्वस्यापि संतुलनमप्युपाकरणं नीत्यां विहिता वर्तते, तच्च शिक्षकान् सशक्तार्थं स्वातन्त्र्यरूपेण विकसनार्थमन्यतमत्त्वेन अपेक्षते।

शिक्षक-प्रशिक्षणस्य यथायोग्यं क्षमतानिर्माणमपि राष्ट्रियाशिक्षानीत्यनुसारं शिक्षकान् NEP इत्यनुरूपमपि संदधाति। अपरिप्राप्तानामाधारभूतसंरचनाः संसाधनञ्च (Digital) तकनीक्युपकरणेषु गुणवत्तापूर्णशिक्षणसामग्रीणामप्युपलब्धिः एतदनुसारं भवति। शिक्षकछात्रयोः कक्षासु अनुपातस्यापि विषये नीत्यां विचारिता वर्तते। शिक्षकस्य कार्यभारः तथा प्राशासनिकगतिविधीनामानुरूप्यं येन शिक्षकैः शिक्षणातिरिक्तेषु शैक्षणिककार्येषु विवृत्तिः न्यूनातिन्यूनं स्यादेतदनुगुणमपि तत्रैव विचारितम्। राष्ट्रियाशिक्षानीतिरियं नैरन्तर्यं शिक्षकेभ्यः शिक्षाधिगमाय प्रवृद्ध्यैश्च प्रोत्साहयति। एवं शिक्षकेभ्यः तेषां योगदानाय पुरस्कृत्यर्थं नूनं वियत्नते। शिक्षकान् स्वात्मीयकक्षासु रचनात्मकावसरोऽपि प्रदीयते, यतः तेषां पाठ्यक्रमाय नवाचाररूपेणाध्यापनाय स्वातन्त्र्यं लभते। शिक्षासंस्थासु निहितां गतिहीनतमेवं सामाजिकौदासीनतावस्थां परिवर्तयितुं तदियं शिक्षानीतिः बहुरायामी बहुस्तरीयञ्च योजनां प्रस्तौति। शिक्षकनियुक्तिषु पारदर्शिता, तस्य प्रोन्नतिः योग्यता च, व्यावसायिकमानकेषु निर्धारितेभ्यः शिक्षकेभ्यः शिक्षाकार्यक्रमव्यापकता, शिक्षणविधिषु सुप्रौढत्त्वम् एवं तदिमं प्रति कटिबद्धता परिलक्षितो जायते। आधुनिकसंसाधनेभ्यः विद्यालयीयप्रकृतेः प्रशिक्षणवातावरणाच्च कक्षायां समृद्धमुपैति। अस्यां

9. col.5.8 NEP 2020 Report

नीतौ उच्चशिक्षासंस्थानानां शासकमण्डलगठने (BOARD OF GOVERNENCE) कृते शैक्षणिकप्राशासनिकस्वायत्तताया: प्रावधानमपि सम्पादयत् तथा तेन छात्रशिक्षकयोरपि स्वायत्तताया: समावेश: नीत्यां नियतोऽभूत्। तदुद्देश्यमिदमेव तावत्सुनिश्चयनं न कोऽपि छात्र: जन्मना उताहो पृष्ठभूमिपरिस्थितिना शिक्षाया: उत्कृष्टरूपेण प्राप्तावसरेभ्य: वञ्चितो न भूयात्।

## परिवर्तनस्यावश्यकता

वर्तमानसमये शिक्षके शिक्षाया: गुणवत्त्वस्य न्यूनता बहुतरं प्राप्यते । विषयेऽस्मिन् गान्धी- महात्मनापि प्रोक्तम्[10]- **अस्माकं शिक्षा परिवेशानुकूला भवेत्।** न केवलं शिक्षकस्य शिल्पकेन्द्रित्त्वमपितु औद्योगिकप्रशिक्षणं बुद्धिमत्तापूर्णयुक्तं च स्यात्। शिक्षकशिक्षाया: कार्यक्रममाध्यमेन तस्योन्नयनेन विश्वविद्यालयेषु महाविद्यालयेषु चैमिमं योजयितुमनुशंसा कृता। शिक्षाशास्त्रीत्यादि कक्षासु न केवलं शिक्षणशास्त्रमपितु कस्मिञ्श्चिदपि विद्यालये पाठितानां विविधविषयाणामपि संज्ञानं सम्यक्प्रदीयते । नैकेभ्य: प्रशिक्षणसंस्थानेभ्य: प्रायोजितपरीक्षारहितेनैव शिक्षकोपाधिनामावंटनस्य स्रोतभूता:। इयं शिक्षानीति: तदिमां व्यवस्थां सुनियोजयितुं कृतसंकल्पा वर्तते। नीत्यां शिक्षकप्रशिक्षणे विशेषेण प्रविधि: निहिता ।

अद्यत्त्वे भारतस्थितिप्रकल्प्य समतामूलकस्य समाजस्य रचनायामपि शिक्षकाणां भविष्ये योगदानं समावेशिशिक्षासंकल्पनायां समाजे सर्वेषामेकत्रीभूतानां वंचितानाञ्च बालकानां शिक्षा तदस्यां राष्ट्रियशिक्षानीत्यां समाहिता अस्ति। शिक्षानीतौ स्थानविशेषे शिक्षणं तथा भाषादक्षतायारप्याकलनं पात्रतापरीक्षायामङ्गभूत्त्वेन तेस्थीयते। स्थानीयकलानां, शिल्पस्य, कृषिज्ञानस्य चित्राकृतेश्च संप्रेषणे तद्देशीयविशेषज्ञान् प्रशिक्षकत्त्वेन मान्यता प्रदीयते। एतादृशी चयनप्रक्रिया देशीयपरिप्रेक्ष्यं महत्वपूर्ण-मुपपादयन् प्रतिभायुक्तानां ग्रामीणशिक्षार्थिभ्य: दैनिकवृत्तये आश्वासनं दातुं शक्यते। येन शिक्षाया: सम्बन्ध: समुदायत्वेन स्थापिते सति शिक्षार्थिन: आश्वस्तभूता: स्थिरतामनुभूय अध्ययनाध्यापनं सम्पादयन्ति। शिक्षकस्य दक्षता स्थानीयभाषायारपि स्यात् तेन मातृभाषायां संस्कृत्यनुरूप-ज्ञानस्यादानप्रदानं सारल्यमनुभूयते। यथोल्लिखितं च प्रतिवेदने[11]- **मातृभाषया प्रारम्भिकशिक्षाप्रदानं सार्वभौमिकरूपेण सिद्धान्तस्य स्वीकृति: परमद्यापि राज्येषु आधिकारिकभाषायारेव शिक्षा प्रदानञ्च जायते येन जनजातीयाधिकारिकभाषयो: भेदश्च जन्यते।** शिक्षणे मौखिकसंप्रेषणस्य अत्यधिकमहत्वं निर्धारिते चयनप्रक्रियायां साक्षात्कारस्योपयोगिता सिद्ध्यति। वर्तमानसमये **(learner centric)** बालककेंद्रितस्यय **(child centric)** चर्चा जायते परमस्यानेकौपायप्रभृतिभि: निर्धारिता

10. Education must be suited to the surroundings. New Education policy and Development challenge, Maitreya Balsara,
11. Ch-10, Problems of Tribal Education in India, Midatala Rani, Kanisha Publishers, New Delhi.

सफलता न प्राप्ता। वस्तुतस्तु विषयेऽस्मिनुल्लिखितञ्च[12]- **कक्षायां गमनावसरे तदानुकूल्या पद्धतिः भवेदिति निर्धारणीयं, का वा पद्धतिः विषयकेन्द्रिता आहोस्वित् छात्रकेन्द्रिता इत्यादिविषये प्रवेशात्पूर्वमेव ध्यातव्यम्।** तदियं शिक्षानीतिः अध्ययनकेंद्रितस्य (**learning centric**) तथा शिक्षकाधारितस्य (**teacher based**) उभयोः विषययोः समानं महत्त्वं प्रदत्तं वर्तते। अध्ययनस्य दायित्त्वं विद्यार्थिनः खलु, शिक्षकस्तु मार्गदर्शकत्त्वेन भूमिकां निर्वर्त्त्य स्वकार्यमुपाकरोति। अस्यां शिक्षानीत्यां पाठ्यक्रमनिर्धारणे शिक्षकस्य महत्त्वपूर्णतायां सम्यगेव विधत्तम्।

राष्ट्रीयशिक्षानीत्याः एतादृशानां नागरिकाणां निर्माण येषां वैचारिकीक्षमता, बौद्धिकीक्षमता, कार्यव्यवहारदृष्ट्या समाजे देशे चोपयुक्तो भवेत्। देशस्य निम्नवर्गाणामिदमेव सेवा कर्तव्या यत्तेषां शिक्षणं सर्वकारः व्यवस्येत। तेषां लुप्तप्रायिक-व्यक्तित्वस्य विकासश्च जायेत। प्रत्येकं राष्ट्रं प्रत्येकं पुरुषं स्त्रींश्च स्वोद्धारस्य प्रयासः स्वयमेव विधातव्याः।

अमुष्य लक्ष्यस्य प्राप्तये तदियं शिक्षानीतिः प्रत्येकस्तरेषु क्रियान्वयनं विधीत्य भारतीयतां पुनर्प्रतिष्ठापनाय सशक्तिर्वितरति। शिक्षायाः सैद्धान्तिकव्यावहारिक-पक्षयोः राष्ट्रियशिक्षानीत्यां चेष्टितो वर्तते। विद्यालयीयशिक्षामुत्तीर्य शिक्षार्थिभिः विभिन्नप्रकारकं कौशलत्त्वमवाप्स्यन्तीति स्पष्टम्। येन तदीप्सितक्षेत्रेषु वृत्यादिकानामुपलब्धिः सौकर्यतायुक्तं भवति। अस्यां नीत्यां छात्राणामाकादमिकस्य स्वास्थ्यस्य च विषये मतकेन्द्रिता वर्तते यतः तेषां मानसिकस्वास्थ्यसन्दर्भेऽपि विमर्शादिकं भूयात्। तदर्थं शिक्षणसंस्थानेषु परामर्शकेन्द्रस्यापि स्थापना (COUNCILING CENTRE) प्रविधीयते। उच्चशिक्षास्तरेष्वपि अनुशासनात्मक-प्रणाल्या शिक्षार्थीकेंद्रिताध्ययनकार्यक्रमाणां छात्राणां विकासाय संस्तुति विहिता वर्तते। यदि सर्वेऽपि विद्यार्थिनः, शिक्षकाः अभिभावकाश्च स्वकीयभूमिकानां निर्वाहः संविधास्यन्ति तर्हि गुरुकुलमिवादर्शशिक्षायाः प्रतिपत्तिः सम्यग्जायते। अनेन प्रकारेण शिक्षकः शैक्षिकप्रौद्योगिकानामुपयोगैः गुणवत्तापूर्वकमात्मानुभवं छात्रैस्सह दाढ्र्यं विदधाति। एतेनास्माकं सामाजिकार्थिकयोः आकाङ्क्षयोः शिक्षासन्दर्भे स्वातन्त्र्यत्त्वेनोपयोगिता सम्पत्स्यते। निश्चयं हि अनया नीत्या प्रस्तावितानां महतां लक्ष्याणां प्राप्तये शिक्षकवर्गः स्वव्यावसायिदक्षतायाः नैयायिककर्तव्यस्य तथा अपरसंवैधानिकप्रावधानाना-मनुसारं शिक्षणं भावीसंततीनां प्राभूते योगदान प्रदेयाः।

**निष्कर्षः**

न केवलं शिक्षकाणां गौरवमपितु आभारतस्य ज्ञानाधारित्त्वं समतावादानुरूपं विकसित-राष्ट्रनिर्माणाय महत्वपूर्णरूपेण योगदानमभविष्यत्। वस्तुतस्तु नीत्यस्यां शिक्षकस्य भूमिकायाः आशावादः अवसरवादश्च प्रभूतमात्रयोपतिष्ठन्ते। अन्यच्चोपस्थितानां प्रवादानां ससाफल्यमुपश्लोकयन्

12. Ch-1,Teacher for Critical Thinking (WESE), C.Burleigh Wellington & Jean Wellington, McGraw-Hill Book Company,INC.

सर्वकारः शिक्षाविदः शिक्षकाः तथा आसमाजं मिलित्वैव कार्यं कृषीरन्। शिक्षाविदा प्रोक्तञ्च-[13] **छात्रशिक्षकयोः संवादे परिवर्तनस्यावश्यकता वर्तते येन छात्राणां जिज्ञासुत्त्वम्, अन्वेषणशक्तिः, स्वप्रकाशश्च विकसिताः जायन्ते। शिक्षकस्तावत् कस्यचिदपि जीवने सूत्राधाररूपेण सहान्वेषकत्त्वेन च आत्मानमुपस्थापयति।** यदि NEP २०२० स्वोद्देश्येषु साफल्यमवाप्नोति, तेन न भारतवर्षे शिक्षकस्तावद् कदापि केवलं पाठकत्त्वेन व्यवहरिष्यन्ति परं समाजे मार्गदर्शकत्त्वेन, संरक्षकत्त्वेन, नैतिकादर्शानानां वाहकत्त्वेन तथा भावीकल्पानां शिल्पकारत्त्वेन व्यवहरन्ति। नीत्यां न केवलं शिक्षणव्यवस्थायारपितु भारतीयसंस्कृतिः, कला, भाषा, एवं लोकविद्या इत्येतेषामपि सम्यगुल्लेखश्च नितरा प्राप्यते। १९८६तमाब्दस्य नीतिः मंत्रालयस्य संज्ञां परिवर्त्य मानवसंसाधनविकासमंत्रालयः इत्यस्थापयत्, परन्तु राष्ट्रियशिक्षानीतिः २०२०तम्यां शिक्षामंत्रालयः इति धिया व्यवस्थपयत्। मनुष्याय संसाधनमात्रस्यापेक्षा भारतीयदर्शनदृष्ट्या तु नास्ति, अपितु तद्दृष्ट्या मनुष्यः भारतीयमूल्यानां, विचाराणां, दर्शनानां, कलानां, विज्ञानानां, पर्यावरणमित्यादीनाञ्च विषयेषु ज्ञानं तद्गतयोगदानं विधाय मनुष्यत्त्वं ससफाल्यमुपाकरोति। यदा शिक्षकेभ्यः कर्तव्यबोधं प्रति निष्ठा नितरां निवसति तदैव तद्गुणविशिष्टस्य तदवच्छिन्नछात्रेषु समावेशो सम्पत्स्यते। विद्यालयव्यावहारिकयोः अंतःसम्बन्धानां तदियं नीतिः पुनर्स्थापनाय शिक्षायाः समाजस्य च कर्त्तव्यत्वेन रेखांकितो कृतो वर्तते। तदियं नीतिः शिक्षकेभ्यः राष्ट्रीयव्यवसायिकयुक्ता परिषद् स्थापयति, येन राष्ट्रीयशैक्षिक- अनुसंधानम् एवं प्रशिक्षणपरिषद्, राज्यशैक्षिक-अनुसंधानम् एवं प्रशिक्षणपरिषद् तथा अन्येषां विषयस्थविशेषज्ञानां परामर्शोऽपि यथासम्भवं नीयते। तेभ्यः शिक्षकेभ्यः अकादमिकीनेतृत्वस्याप्यवसरः विभिन्नप्रशिक्षण-कार्यक्रमैः प्रदीयते। भारतीयसर्वकारेण व्यावसायिकमानकानुसारं तत्समीक्षा संशोधनञ्च २०३०तमे वर्षे भविष्यति, तदनु प्रत्येकं दशाब्दं भविता। इत्येवप्रकल्पितं मदीयं शोधकल्पस्तावत्। आशासे भवद्भिः रुच्यते अङ्गीक्रियते च।

## सन्दर्भग्रन्थानुक्रमणिका


1 **कौटिल्य अर्थशास्त्रम्**, व्याख्याकार- वाचस्पति गैरोला, चौखम्भा विद्याभवन, वाराणसी, 1984 तृतीयसंस्करणम्

2 **छान्दोग्योपनिषत्** शाङ्करभाष्यसहितम्, गीताप्रेस, गोरखपुर, 1993 प्रथमसंस्करणम्

3 **महाभाष्यम्**, सम्पादक- श्रीभार्गव शास्त्री, चौखम्भा संस्कृत प्रतिष्ठान, दिल्ली, 1987 संस्करणम्

4 **वेदान्तसारः**, व्याख्याकार- आद्या प्रसाद मिश्र, अक्षयवट प्रकाशन, इलाहाबाद,1999 प्रथमसंस्करणम्


13. National Education Policy and Development Challenge, Maitreya Balsara,

5 **भोजप्रबन्धः**, देवर्षिसनाढ्य शास्त्री, चौखम्भा प्रकाशन, वाराणसी, 1979 प्रथमसंस्करणम्

6 **My Idea of Education,** Swami Vivekananda, Advaita Ashrama, Kolkata,2008 First Edition

7 **New Education policy and Development challenge,** Maitreya Balsara, Kanisha Publishers, 2007 First Editon

8 **Problems of Tribal Education in India,** Midatala Rani, Kanisha Publishers, New Delhi, 2009 First Edition

9 **Teaching for Critical Thinking,** C. Burleigh Wellington, Jean Wellington, McGraw-Hill Book Company,1960 First Edition

10 **School to Work,** David Stern, The Standford Series, 1995 First Editon

11 **GURU,** John Mitchiner, Penguin India, 1991 First Edition

**अन्तर्जालसन्दर्भः**

. **www.education.gov.in**

. **http://hi.prsindia.org**

. **www.pib.gov.in**

. **www.wikipedia.org**